Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत -

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २१७
मे - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### कल्याणकृत् दुर्गतिं न गच्छति

समाजस्य दृढीकरणाय उत्तमं नेतृत्वम् अपेक्ष्यते । यस्मिन् समाजे उत्तमाः नेतारः जायन्ते सः समाजः विशेषतः समृद्धिं प्राप्नोति भद्राणि च पश्यति । नेतृत्वं सर्वत्र आवश्यकम् । सामादीनाम् उपायानां व्यवस्थापनार्थं नेतृत्वम् आवश्यकम् । तथैव कर्तव्यबोधे अपि आवश्यकम् । अतः एव अद्यतनाः शिक्षकाः, मातापितरौ, मन्त्रिणः, परिषत्प्रमुखाः वा नेतृषु गणनां प्राप्नुवन्ति । तत्र बौद्धिकं नेतृत्वं कुर्वाणाः लेखकाः, चिन्तकाः, विज्ञानिनः, भाषाविदः वा योजनीयाः भवेयुः ।

नेता कीदृशः भवेत् ? अस्मिन् विषये मनोविज्ञाने बहुविधं चिन्तनम् उपलभ्यते । परन्तु तेन सह भगवद्गीता कथं स्थातुं शक्नुयात् ? इत्यपि चिन्तनीयम् । श्रीकृष्णस्य उत्कृष्टं नेतृत्वं सकले महाभारते द्योतते । समग्रं महाभारतम् अध्येतुम् अशक्तः मनुष्यः भगवद्गीतायाः कांश्चन पाठान् (उपदेशान्) ग्रहीतुं मतिं कुर्यात् ।


नेतुः विचाराः आचाराः वा समाजे प्रतिबिम्बिताः भवन्ति । भ्रष्टः नेता भ्रष्टाचारस्य एव पाठान् पाठयति । परन्तु सत्यप्रियः नेता स्वीयेन सदाचरणेन समाजं सत्कार्यं प्रति प्रेरयति । अस्मिन् विषये विशेषतः प्रस्तुतं भविष्यति कृष्णस्य एतत् वचनम् – 'यत् यत् आचरति श्रेष्ठः तत् तत् एव इतरः जनः ।' यस्य निश्चयात्मिका बुद्धिः दुर्बला भवति सः नेता सफलतां न विन्दते । संशयशीलः नेता अनुयायिषु श्रद्धां जनयितुं न शक्नोति । तादृशः नेता उचितं निर्णयं कर्तुं न शक्नोति । सः स्वयं भ्रान्तः सन् अनुगान् अपि भ्रामयति । अतः एव, भगवता उक्तम् 'संशयात्मा विनश्यति' वाक्यं नेतृभिः अवगन्तव्यम् ।

अधीरः नेता विपत्तौ नैराश्यम्, ततश्च भयम् अनुभवति । एतत् हृदयदौर्बल्यं नेतृत्वे बाधकं भवति । ततः पराजयस्य सम्भावना वर्धते । श्रेष्ठः नेता तु विपत्काले बुद्धिपूर्वकं कृतेन उत्थानेन साफल्यं लभते । अतः एव श्रीकृष्णेन उक्तम् – 'क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ परन्तप ।'

श्रीकृष्णः सर्वविधेभ्यः नेतृभ्यः कथयति यत् – 'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति ।' एतत् महावाक्यं खलु आत्मबलस्य दृढीकरणे नितराम् उपयुक्तं वर्तते । कर्मसु कल्याणस्य भावना भवति चेत् कुतश्चित् साहाय्यं लभ्यते एव । एषः चमत्कारः नास्ति, अपि तु मनस्विभ्यः नेतृभ्यः भगवता दत्तम् अभयवचनम् अस्ति ।

# अपूर्वः जलोद्गमः

**– जातककथा**



प्राचीने काले काशीराज्यं राजा ब्रह्मदत्तः पालयन् आसीत् । तत्समये बोधिसत्त्वः कस्मिंश्चित् वणिक्कुले जन्म प्राप्तवान् । प्राप्तवयस्कः सः पञ्चशतशकटोपेतस्य सार्थस्य स्वामी जातः।

कदाचित् बोधिसत्त्वस्य सार्थः काञ्चित् मरुभूमिं प्राप्नोत् । सा मरुभूमिः षष्टि–योजनविस्तीर्णा आसीत्। तत्रत्याः सिकताः अतिमसृणाः आसन्। हस्तेन गृहीतं चेत् अङ्गुलीनां मध्यतः पतन्ति स्म ताः । रात्रिसमये तत्प्रदेशे शैत्यं भवति स्म । दिने सूर्यः यथा यथा अग्रे गच्छति तथा तथा औष्ण्यं वर्धते स्म । मध्याह्नकाले तु तप्ताङ्गाराः इव तापं जनयन्ति स्म सिकताः । अतः दिवासमये तस्यां मरुभूमौ सञ्चारः एव नितरां कष्टकरः आसीत्। अतः तत्र ये प्रयाणं कुर्वन्ति स्म ते रात्रौ एव प्रयाणं कुर्वन्ति स्म। मरुभूमिप्रवेशात् पूर्वम् एव पर्याप्तमात्रेण तण्डुल–तैल–काष्ठ–जलादीनि सङ्गृह्णन्ति स्म। समुद्रयात्रायां यथा तथैव नक्षत्राणां दर्शनेन दिशानाम् अभिज्ञानं प्राप्नुवन्तः ते रात्रौ स्वस्य प्रयाणम् अनुवर्तयन्ति स्म । यदा प्रातःकालः भवति तदा यात्रां स्थगयित्वा वर्तुलाकारेण शकटान् स्थगयित्वा मध्ये मण्डपं निर्मान्ति स्म । तापवृद्धेः पूर्वं पाकं कृत्वा भोजनं समाप्य सूर्यास्तपर्यन्तं विश्राम्यन्ति स्म।

बोधिसत्त्वः एतादृशेन क्रमेण एव प्रयाणं कुर्वन् मरुभूमिसीमापर्यन्तम् आगतवान् आसीत्। इतोऽपि योजनमात्रम् अति–क्रमणीयम् आसीत्। बोधिसत्त्वः अचिन्तयत् यत् रात्र्यभ्यन्तरे मरुभूमिः अतिक्रान्तुं शक्या इति। अतः सायङ्काले प्रस्थानात् पूर्वं जलसङ्ग्रहं रिक्तीकारितवान् सः । भारः न्यूनः भवति चेत् प्रयाणं वेगेन भवितुम् अर्हति इति तस्य चिन्तनम् आसीत्।

सर्वाग्रे स्थितः शकटः मार्गदर्शकः भवति प्रयाणे । तस्य चालकः आरात्रि निद्राम् अकुर्वन् नक्षत्राणि परिशीलयन् केन मार्गेण गन्तव्यम् इति निर्णयति स्म । उच्चध्वनिना मार्गस्य घोषणं करोति स्म सः । किन्तु एतदवसरे निद्रां कथमपि सोढुम् अशक्नुवन् सः नेत्रे निमीलितवान्। शाकटिकस्य एतस्य प्रमादस्य कारणतः शकटे योजिताः वृषभाः तं मार्गम् अनुसृतवन्तः, येन च मार्गेण आगतम् आसीत्।

सूर्योदयसमये शाकटिकः जागरितः जातः। नक्षत्राणां गतिं परिशील्य सः आज्ञापितवान् यत् येन मार्गेण आगतं तस्य विरुद्धेन मार्गेण गन्तव्यम् इति।

शकटाः तदनुगुणं नीताः । किन्तु यस्मात् अपायात् ते रक्षणम् इच्छन्ति स्म सः एव अपायः तैः

सम्मुखीकरणीयः अभवत्। प्रातःकाले तैः दृष्टं यत् गतायां रात्रौ यत्र वासः कृतः तदेव स्थलं प्रति–आगतम् इति। तत्र जलं कुत्रापि न आसीत्।

निराशाः सन्तः ते शकटं वर्तुलाकारेण स्थगितवन्तः। महान्तं खेदम् अनुभवन्तः शकटानाम् अधः शयनं कृतवन्तः च।

अन्ये इव बोधिसत्त्वः अपि यदि धैर्यहीनः भवेत् तर्हि सर्वेषां मरणम् अभविष्यत् प्रायः। बोधिसत्त्वः तु प्रयाणस्थगनसमनन्तरम् एव इतस्ततः सञ्चरन् जलस्य मूलं जागरूकतया अन्वेष्टुम् उद्युक्तः जातः। बहुधा अन्वेषणस्य अनन्तरं तेन कुत्रचित् दर्भसमूहः कश्चन दृष्टः। 'एतस्मिन् स्थले गभीरस्तरे वा यदि जलं न स्यात् तर्हि एते दर्भाः प्रवृद्धाः न अभविष्यन्' इति अचिन्तयत् बोधिसत्त्वः। अतः सः स्वस्य अनुचरान् आदिष्टवान् ''एतस्मिन् स्थले कुद्दालेन खननं क्रियताम्'' इति।

षष्टिहस्तगभीरतापर्यन्तं यदा खननं कृतं तदा खनित्रस्य अग्रं कयाचित् शिलया घट्टितं सत् 'खन्' इति शब्दम् अकरोत्। शिलाप्राप्तिं दृष्ट्वा सर्वे हताशाः जाताः। यतः अग्रे खननम् अशक्यम् आसीत्। किन्तु बोधिसत्त्वः हताशः न जातः। तस्य विश्वासः आसीत् यत् शिलाफलकस्य अधः जलं स्यादेव इति। सः गर्ते अवतीर्य शिलायाः समीपं स्वकर्णं नीत्वा परीक्षितवान्। जलवहनशब्दः क्षीणतया श्रुतः तेन।

ततः सः उपरि आगत्य सहकारिणः अवदत् – ''मित्राणि! यदि वयं हताशतया तिष्ठेम तर्हि निश्चयेन सर्वे मरणं प्राप्नुयाम। अतः इदानीं महता प्रयासेन वा अस्माभिः शिलायाः भञ्जनं करणीयम्। शिलायाः अधः जलं तु अस्ति निश्चयेन। तत् वयं यदि प्राप्नुयाम तर्हि अस्माकं सर्वेषां प्राणाः रक्षिताः भवेयुः'' इति।

बोधिसत्त्वस्य मनसि जलप्राप्तिविषये यः विश्वासः आसीत् सः अन्येषां मनसि न आसीत्। तथापि नायकस्य आदेशं तिरस्कर्तुम् अशक्नुवन्तः ते महामुद्गरादिभिः महता बलेन तां शिलां निरन्तरं प्रहृतवन्तः।

अन्ते शिलायां भङ्गरेखा दृष्टा। पुनरपि प्रहारः यदा कृतः तदा सा भङ्गरेखा विशाला जाता, ताडवृक्षप्रमाणेन जलं निर्गतं च। एतत् दृष्टवतां सर्वेषां महान् सन्तोषः। सर्वे महता आनन्देन तत् जलं पीतवन्तः, स्नानादिकं कृतवन्तः च। शकटानां प्राचीनानि चक्राणि भञ्जयित्वा तेषां साहाय्येन पाकः अपि कृतः। वृषभेभ्यः जलतृणादिकं दत्तम्। भोजनं समाप्य सायङ्कालपर्यन्तं सर्वैः विश्रान्तिसुखम् अनुभूतम्।

रात्रौ पुनरपि प्रयाणम् अनुवर्तितम्। प्रस्थानात् पूर्वं तैः तत्र अभिज्ञानाय एकः उन्नतः ध्वजः प्रतिष्ठापितः। सः च दूरात् एव जलस्य उपस्थितिं सङ्केतयति स्म। ततः ते प्रयाणम् अनुवर्तयन्तः मरुभूमिम् अतिक्रम्य उद्दिष्टं नगरं प्राप्तवन्तः।

तत्र उत्तमेन मूल्येन तेषां सर्वाणि वस्तूनि विक्रीतानि अभवन्। उत्तमः लाभः अपि प्राप्तः तैः।

केषाञ्चित् दिनानाम् अनन्तरं बोधिसत्त्वः अनुयायिभिः सह स्वस्य नगरं प्रत्यागतवान्। वाणिज्यात् यत् धनं प्राप्तं तत् धार्मिककार्याय दानरूपेण च व्ययीकृतवान् बोधिसत्त्वः सुखेन शेषजीवनं यापितवान्।

## प्रतिमानाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

अनुवर्तते

महाकविभासप्रणीते प्रतिमानाटके एतावताऽस्माभिः दृष्टं यत् – चेट्याः हस्ताद् वल्कलानि गृहीत्वा सीता धरति। रामेण स्वकीया वनं प्रति गमनस्य वार्त्ता सीतायै निवेदिता। ततश्च त्रयोऽपि वनं प्रति गच्छन्ति। द्वितीयेऽङ्के रामलक्ष्मणवैदेहीनां वनगमनेन दशरथस्य चित्तशून्यता वर्णिता। पितृणां स्मरणपूर्वकं दशरथस्य प्राणैः विमुक्तिः उपवर्णिता। तृतीयेऽङ्के भरतस्य अयोध्यां प्रत्यागमनं वर्ण्यते। गुरुभिः विशिष्टे काले आदिष्टः सः अयोध्यायाः बहिः विश्राम्यति। प्रतिमागृहं गत्वा स दशरथस्य प्रतिमां दृष्ट्वा मूर्च्छितः।

भरतः समाश्वास्य जननीः प्रणमति। कैकेय्याः प्रणमनावसरे भरतः चरणौ अस्पृष्ट्वा अप्रणम्य तस्याः कार्यं गर्हते।

**''त्यक्त्वा स्नेहं शीलसङ्क्रान्तदोषैः पुत्रास्तावद् नन्वपुत्राः क्रियन्ते।**
**लोकेऽपूर्वं स्थापयाम्येष धर्मं भर्तृद्रोहादस्तु माताऽप्यमाता ॥ ३/१८ ॥''**

भरतः कथयति यत् – सः अयोध्यायां प्रवेशं न करिष्यति। सुमन्त्रेण तथा कारणं पृष्टे कथयति –

**''तत्र यास्यामि यत्राऽसौ वर्तते लक्ष्मणप्रियः।**
**नाऽयोध्या तं विनाऽयोध्या साऽयोध्या यत्र राघवः ॥ ३/२४ ॥''**

चतुर्थाङ्कस्य प्रवेशके विजयानन्दिनिकयोः संवादेन ज्ञाप्यते यत् कैकेय्याः रामः तपोवनं गमितः इति प्रवादः सर्वत्र प्रसृतः। भरतः आश्रमपदं प्राप्तः। स रामाय निवेदयितुम् आज्ञापयति–

''राज्यलुब्धायाः कैकेय्याः पुत्रो भरतः प्राप्तः।'' ''इक्ष्वाकुकुलन्यङ्गभूती भरतो दर्शनम् अभिलषति।''

**''निर्घृणश्च कृतघ्नश्च प्राकृतः प्रियसाहसः। भक्तिमान् आगतः कश्चित् कथं तिष्ठतु यात्विति ॥ ४/५ ॥''**

भरतसुमन्त्रयोः मिथः संलापं श्रुत्वा बन्धोः आगमनविषये सन्दिग्धः रामः लक्ष्मणं द्रष्टुं प्रेषयति। त्रयाणां भ्रातॄणां सीतायाः च मेलनं भवति। भरतः आत्मानं गर्हते। सुमन्त्रोऽपि प्रविशति। भरतः रामेण सहैव स्थातुमिच्छन् अभिधत्ते –

**इह स्थास्यामि देहेन तत्र स्थास्यामि कर्मणा। नाम्नैव भवतो राज्यं कृतरक्षं भविष्यति ॥ ४/१९ ॥**

रामः महता यत्नेन तं राज्यं पालयितुं निराकरोत्। भरतोऽपि रामस्य राज्यं वनवाससमयं यावदेव पालयिष्यतीति निवेदयति तस्य पादुके च प्रार्थयते –

**पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**
**यावद् भवानेष्यति कार्यसिद्धिं तावद् भविष्याम्यनयोर्विधेयः ॥**

रामः अद्यैव तस्मै प्रतिनिवर्तितुं कथयति सुमन्त्रं च भरतं दशरथम् इव पालयितुं कथयति। अनेन च चतुर्थोऽङ्कः समाप्तः भवति। पञ्चमे अङ्के रामसीतयोः संवादः भवति येन इदं ज्ञायते यत् पितुः दशरथस्य अनुवत्सरश्राद्धविधेः कालः समुपस्थितः। सः तातस्याऽनुरूपं श्राद्धं कर्तुमिच्छति। तावता कालेन परिव्राजकवेषधारी रावणः प्रविशति। सः ताभ्यां सत्कृतः। परिव्राजकः (रावणः) कथयति यत् काश्यपगोत्रः सः साङ्गोपाङ्गानां वेदादिशास्त्राणाम् अध्येता। तेषु एकतमः तस्य विषयः श्राद्धकल्प इति। एतत् श्रुत्वा रामः पितुः श्राद्धविषये स्वेष्टं प्रश्नं पृच्छति। रावणोऽपि कथयति ''श्रद्धया दत्तमिति श्राद्धम्।'' तत्र विशिष्टे वस्तुनि पृष्टे सः हिमालये स्थितानां काञ्चनमयमृगाणां विषये ज्ञापयति। रामः गत्वा मृगमानेतुं सज्जतां प्रदर्शयति। तदैव विद्युत्सम्पातः भवति। तत्र च तादृशः स्वर्णमयमृगः दृश्यते। रामः लक्ष्मणाय तम् आनेतुम् इतस्ततः पश्यति किन्तु सः पूर्वमेव कुलपतिं प्रति गतः। रामः शुश्रूषायै सीतां स्थापयित्वा मृगस्य पृष्ठे गहनं वनं प्रविष्टः। रावणः स्वं रूपं धृत्वा सीताम् अपहरति।

**( क्रमशः... )**


# मासवार्त्ताः

## आरब्धौ संस्कृतभाषाशिक्षणवर्गौ




संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य अनेकान् वर्गान् नियतम् आयोजयति । एतस्मिन् उपक्रमे एप्रिलमासस्य १२ दिनाङ्कतः संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य १५ दिनाङ्कतः द्वितीयस्तरस्य च आरम्भः जातः वर्तते । संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य समयः सायं ६:३० तः ८ वर्तते । संस्कृतभाषाशिक्षणस्य द्वितीयस्तरस्य समयः प्रातः ७ तः ८:३० च वर्तते । अत्र उल्लेखनीयं यत् एकलव्य-संस्कृत-एकेडेमीसंस्थानेन छात्राः Online एवं च Offline मिलित्वा पठितुं शक्नुयुः तथा व्यवस्था कृता वर्तते । उभयोः वर्गयोः आहत्य ३३ छात्राः प्रवेशं स्वीकृतवन्तः । एतौ वर्गौ जुलाईमासपर्यन्तं प्रचलिष्यतः ।

## मार्गदर्शनकेन्द्रम्




गान्धिनगरजनपदे लाकरोडाग्रामे आर्यसमाजस्य प्रेरणया दर्शनयोगधाम्नः लोकार्पणसमारोहः एप्रिलमासस्य १५, १६, १७ दिनाङ्केषु आयोजितः आसीत् । कार्यक्रमेऽस्मिन् संस्कृतभाषायाः प्रचाराय एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्थानस्य प्रवृत्तीनां मार्गदर्शनाय एकं मार्गदर्शनकेन्द्रम् स्थापितम् आसीत् । मार्गदर्शनकेन्द्रेऽस्मिन् श्रीश्यामः पटेलः, श्रीनिसर्गः गज्जरः, श्रीपारुल व्यासः, श्रीमती सङ्गीता मिस्त्री, श्रीमती भावना रावलः च स्वकीयां सेवां दत्तवन्तः ।

## कृपया हसन्तु

**रमण: - (मातरम् उद्दिश्य) भो: मात:, भवती काचस्य तं चषकं स्मरति यस्य विषये भवत्या: सर्वदा चिन्ता भवति स्म यत् स: भग्न: न भवेत् ?**

**माता - आम्, किन्तु त्वम् अद्य तं चषकं किमर्थं स्मरसि ?**

**रमण: - भवत्या: चिन्ता अपगता अधुना ।**

★ ★ ★ ★ ★

**कश्चन अधिकारी कार्यालये कर्मचारिणां पुरत: एकस्मिन् जलपात्रे पाषाणं क्षिप्त्वा सर्वान् अपृच्छत् - "अयं पाषाण: किमर्थं जले निमग्न: ?" "पाषाण: भारयुक्त: आसीत् अत: जले निमग्न:" इति सर्वे उदतरन् । तत: अधिकारी आत्मानं प्रियम् एकं कर्मचारिणम् अपृच्छत् - "त्वं वद । अयं पाषाण: किमर्थं निमग्न: ?" "महोदय ! मया तदेव ज्ञातं यत् भवान् यं त्यजति स: निमज्जति" इति अवदत् वाक्पटुकर्मचारी ।**

★ ★ ★ ★ ★

**रमण: - (नमनम् उद्दिश्य) भो: नमन ! त्वं जीवने किं प्राप्तुम् इच्छसि ?**

**नमन: - धनम् ।**

**रमण: - धनम् एकत्र स्थापय । इदानीं वद त्वं किं प्राप्तुम् इच्छसि ?**

**नमन: - एकत्र स्थापितं धनम् ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**मरणं प्रकृति: शरीरिणां विकृतिर्जीवितमुच्यते बुधै: ।**
**क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ॥**

**तात्पर्यम्** – सर्वेषां प्राणिनां मरणं स्वभावसिद्धम् । तत् परिहर्तुं केनापि न शक्यते । जातस्य मरणं निश्चितम् एव । किन्तु जीवनं न निश्चितम् । तत् आकस्मिकं, न तु स्वभावसिद्धम् । अद्यैव जीवनं समाप्तं स्यात्, अथवा श्व: । जीवितस्य पुरुषस्य मरणं भवत्येव । किन्तु मृतस्य पुन: जीवितं भविष्यति इत्यत्र न निश्चय: । अत: क्षणकालमपि जीव: यदि देहे तिष्ठति तर्हि तदेव प्राणिनां महालाभ: । किञ्च, मरणेऽपि शोक: न कार्य: । यत: मरणं प्राणिनां स्वाभाविकम् । यावज्जीवनं सन्तोषेण जीवेत् । यत: दुर्लभं जीवनम् अस्माभि: प्राप्तम् अस्ति ।

**मरुद्भि: पीड्यमानोऽपि सन्त्यक्तोऽपि दिवानिशम् ।**
**विषयस्नेहरहितो रत्नदीपो प्रकाशते ॥**

**तात्पर्यम्** – यथा रत्नरूप: दीप: (उदाहरणं – हीर:) वायुना प्रहृत: अपि, विना तैलमपि, विना अवधानमपि नैरन्तर्येण प्रकाशते, तथैव य: शब्दस्पर्शरूपरसगन्धादीन्द्रियसुखेषु समानचित्त: सन् संयमपूर्वकजीवनयापनं करोति, स: अहर्निशं प्रकाशते ।

## ज्ञानसरित्

श्यामः पटेलः

**विमानस्य "ब्लेक बोक्स"** – कदाचित् गगनमार्गेऽपि विमानानां दुर्घटनाः भवन्ति । तदा विमानदुर्घटनायाः कारणं ज्ञातुम् एकम् उपकरणं सहायकं भवति तदस्ति – "ब्लेक बोक्स" । "ब्लेक बोक्स" एका पेटिका अस्ति यस्यां विमानदुर्घटनायाः पूर्वं यः कोऽपि वार्तालापः ध्वनिः वा विमाने अभवत् तस्य ध्वनिमुद्रणं तस्यां पेटिकायां भवति । येन दुर्घटनायाः कारणं ज्ञातुं शक्नुमः । एषा लघ्वी पेटिका धातुनिर्मिता भवति । यस्यां द्वे उपकरणे भवतः । एकमुपकरणं विमानचालकस्य "कोकपीट" आख्यं स्थानं भवति तस्य ध्वनिमुद्रणं करोति । अपरमुपकरणं विमानस्य "एन्जिन" प्रभृतीनां यन्त्राणां "सेन्सर" इत्येतेन सह योजितं भवति । तत् उपकरणं सर्वेषां यन्त्राणां स्थितेः वृत्तान्तस्य मुद्रणं करोति । उभे उपकरणे प्रत्यर्धघण्टं पुरातनं मुद्रितं वृत्तान्तं स्वयं मार्जित्वा नूतनस्य वृत्तान्तस्य मुद्रणं कुरुतः । यस्मात् वयं विमानस्य यन्त्राणां दुर्घटनापूर्वां स्थितिं ज्ञातुं शक्नुमः ।

दुर्घटनासमये विमानस्य प्रायः सर्वं वस्तुजातं नष्टं वा दग्धं वा भग्नं वा भवति । किन्तु एषा पेटिका सर्वासु स्थितिषु अक्षुण्णा भवेत् तथा निर्मिता भवति । तस्यां ध्वनिमुद्रकं वा "चीप" इत्येतत् वा परितः एल्युमिनियमधातोः आवरणं भवति । एतस्याः पेटिकायाः बहिर्भूतं "सिलिका" इत्यस्मात् निर्मितम् आवरणं १ इञ्चमितं यावत् स्थूलं भवति । यत् औष्ण्येन न गल्यते । एषा पेटिका पुनः स्टील–धातोः दृढपेटिकायां स्थापिता भवति । एषा पेटिका कृष्णवर्णीया भवति । अतः "ब्लेक बोक्स" नाम्ना ख्यायते । अद्यत्वे तु कतिपयेषु देशेषु एतादृशीं पेटिकां कारयानेऽपि जनाः स्थापयन्ति ।

गल्यते – to be dissolved , ख्यायते – to be made famous

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **अम्बुरुहः** | कमल | Lotus |
| **श्रावः** | सुनना/कान देना | Listening |
| **वायकः** | जुलाहा | Weaver |
| **पृक्तिः** | स्पर्श | Touch |
| **स्पन्दनम्** | धड़कना | Throbbing |
| **वर्वणा** | मक्खी | Fly |
| **प्राशनम्** | खाना | Eating |
| **इला** | भूमि | Earth |
| **लपितम्** | कहा हुआ | Spoken |
| **निगदितम्** | प्रवचन | Discourse |
| **कण्ठीरवः** | सिंह | Lion |
| **अष्टकर्णः** | ब्रह्माजी | Brahma |
| **श्रवः** | कान | Ear |
| **श्रान्तः** | थका हुआ | Fatigued |
| **त्रपा** | लज्जा | Shame |

## किं भवन्तः जानन्ति ?

१ ) **ब्रह्मणः नखात् ये उत्पन्नाः ते के ?**
(क) वैखानसाः (ख) सजपाः (ग) पत्राहाराः (घ) वायुभक्षाः

२ ) **कण्ठपर्यन्तम् आत्मानं निमज्जय ये ऋषयः तपश्चर्यां कुर्वन्ति ते के ?**
(क) सजपाः (ख) उन्मज्जकाः (ग) वालखिल्याः (घ) वैखानसाः

३ ) **निरन्तरं जपं कुर्वाणाः ऋषयः के ?**
(क) सुपार्श्वाः (ख) वायुभक्षाः (ग) वालखिल्याः (घ) सजपाः

४ ) **वायुं पीत्वा ये जीवननिर्वाहं सञ्चालयन्ति ते ऋषयः के ?**
(क) सजपाः (ख) पञ्चाग्निसेविनः (ग) वैखानसाः (घ) वायुभक्षाः

५ ) **एतेषु केन योगसूत्राणां रचना कृता वर्तते ?**
(क) पाणिनिना (ख) पतञ्जलिना (ग) भर्तृहरिणा (घ) वात्स्यायनेन

६ ) **सन्ततुकारामस्य सम्बन्धः एतेषु केन प्रान्तेन सह वर्तते ?**
(क) गुजरातेन (ख) महाराष्ट्रेण (ग) बङ्गालेन (घ) राजस्थानेन

७ ) **एतेषु कः दक्षिणभारतस्य आसीत् ?**
(क) रैदासः (ख) कबीरः (ग) त्यागराजः (घ) तुकारामः

उत्तराणि – (१) क (२) ख (३) घ (४) घ (५) ख (६) ख (७) ग

# अस्माकम् आगामिकार्यक्रमाः




## Admission Open 2024-25

**Value Education Through Sanskrit**

# बालसंस्कृतवर्गः

**(Class SKg to 8)**

**Online / Offline**

**Date :** 9/6/24 to 23/3/25
**Day :** Sunday
**Time :** 11:00am to 12:30pm (IST)
**Fees :** 7500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | – 100 |
| द्वैवार्षिकं | रू | – 175 |
| त्रैवार्षिकं | रू | – 250 |
| अङ्कमूल्यं | रू | – 10 |

# सन्धिः

**Date :** 03/06/24 to 26/06/24
**Day :** Wednesday-Friday
**Time :** 6:30pm to 08:00pm
**Fees :** 3000/-

**contact: Dr. Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||


**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006